ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

हरिः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## चतुर्थ काण्डे –पञ्चमः प्रश्नः

# Version Notes:

**This is now the current Version 1.0 dated October 31, 2021**

1. This replaces the earlier version 0.0 dated Oct 17, 2018.

2. We have listened to the Krama Paaraayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till October 31, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

1st Version Number 0.0 dated October 17, 2018

# Table of Contents

4 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः ....................................4
4.5 चतुर्थ काण्डे पञ्चमः प्रश्नः – होमविधिनिरूपणं........................4

================================

**ओं नमः परमात्मने, श्री महागणपतये नमः**

**श्री गुरुभ्यो नमः, हरिः ओं**

# 4 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## 4.5 चतुर्थ काण्डे पञ्चमः प्रश्नः – होमविधिनिरूपणं

**T.S.4.5.1.1 - Kramam**

नमस्ते । ते रुद्र । रुद्र मन्यवे । मन्यव उतो । उतो ते । उतो इत्युतो । त इषवे । इषवे नमः । नम इति नमः ॥ नमस्ते । ते अस्तु । अस्तु धन्वने । धन्वने बाहुभ्याम् । बाहुभ्यामुत । बाहुभ्यामिति बाहु–भ्याम् । उत ते । ते नमः । नम इति नमः ॥ या ते । त इषुः । इषुः शिवतमा । शिवतमा शिवम् । शिवतमेति शिव – तमा । शिवं बभूव । बभूव ते । ते धनुः । धनुरिति धनुः ॥ शिव शरव्या । शरव्या या । या तव । तव तया । तया नः । नो रुद्र । रुद्र मृडय । मृडयेति मृडय ॥ या ते । ते रुद्र । रुद्र शिवा । शिवा तनूः । तनूरघोरा । अघोराऽपापकाशिनी । अपापकाशिनीत्यपाप – काशिनी ॥ तया नः । नस्तनुवा । तनुवा शन्तमया । शन्तमया गिरिशन्त । शन्तमयेति शं – तमया । गिरिशन्ताभि । गिरिशन्तेति गिरि – शन्त ।

अभिचाकशीहि । चाकशीहीतिचाकशीहि ॥ यामिषुम् ।
इषुं गिरिशन्त । गिरिशन्त हस्ते । गिरिशन्तेति गिरि – शन्त ।
हस्ते बिभर्.षि । 1 (50/56)

**T.S.4.5.1.2 - Kramam**

बिभर्.ष्यस्तवे । अस्तव इत्यस्तवे ॥ शिवां गिरित्र । गिरित्र ताम् ।
गिरित्रेति गिरि – त्र । तां कुरु । कुरु मा । मा हि॑ꣳसीः । हि॑ꣳसीः
पुरुषम् । पुरुषम् जगत् । जगदिति जगत् ॥ शिवेन वचसा ।
वचसा त्वा । त्वा गिरिश । गिरिशाच्छ । अच्छा वदामसि ।
वदामसीति वदामसि ॥ यथा नः । नः सर्वम् । सर्वमित् ।
इज् जगत् । जगदयक्ष्मम् । अयक्ष्मꣳ सुमनाः । सुमना असत् ।
सुमना इति सु – मनाः । असदित्यसत् ॥ अद्ध्यवोचत् ।
अवोचदधिवक्ता । अधिवक्ता प्रथमः । अधिवक्तेत्यधि – वक्ता ।
प्रथमो दैव्यः । दैव्यो भिषक् । भिषगिति भिषक् ॥ अहीꣳश्च ।
च सर्वान् । सर्वान् जम्भयन्न् । जम्भयन्थ् सर्वाः । सर्वाश्च ।
च यातुधान्यः । यातुधान्य इति यातु – धान्यः ॥ असौ यः ।

यस्ताम्रः । ताम्रो अरुणः । अरुण उत । उत बभ्रुः ।

बभ्रुः सुमङ्गलः । सुमङ्गल इति सु – मङ्गलः ॥

ये च । चेमाम् । इमाꣳ रुद्राः । रुद्रा अभितः । अभितो दिक्षु ।

दिक्षु श्रिताः । **2** (**50/53**)

**T.S.4.5.1.3 - Kramam**

श्रिताः सहस्रशः । सहस्रशोऽव । सहस्रश इति सहस्र – शः ।

अवैषाम् । एषाꣳ हेडः । हेड ईमहे । ईमह इतीमहे ॥ असौ यः ।

योऽवसर्पति । अवसर्पति नीलग्रीवः । अवसर्पतीत्यव – सर्पति ।

नीलग्रीवो विलोहितः । नीलग्रीव इति नील – ग्रीवः । विलोहित

इति वि – लोहितः ॥ उतैनम् । एनम् गोपाः । गोपा अदृशन्न् ।

गोपा इति गो – पाः । अदृशन्नदृशन्न् । अदृशन्नुदहार्यः । उदहार्य

इत्युद – हार्यः ॥ उतैनम् । एनम् ँविश्वा । विश्वा भूतानि । भूतानि

सः । स दृष्टः । दृष्टो मृडयाति । मृडयाति नः । न इति नः ॥

नमो अस्तु । अस्तु नीलग्रीवाय । नीलग्रीवाय सहस्राक्षाय ।

नीलग्रीवायेति नील – ग्रीवाय । सहस्राक्षाय मीढुषे । सहस्राक्षायेति

सहस्र – अक्षाय । मीढुष इति मीढुषे ॥ अथो ये । अथो इत्यथो ।

ये अस्य । अस्य सत्वानः । सत्वानोऽहम् । अहम् तेभ्यः ।
तेभ्योऽकरम् । अकरम् नमः । नम इति नमः ॥ प्र मुञ्च ।
मुञ्च धन्वनः । धन्वनस्त्वम् । त्वमुभयोः । उभयोरार्त्नियोः ।
आर्त्नियोर्ज्याम् । ज्यामितिज्याम् ॥ याश्च । च ते । ते हस्ते ।
हस्त इषवः । इषवः परा । **3 (50/57)**

**T.S.4.5.1.4 - Kramam**

परा ताः । ता भगवः । भगवो वप । भगव इति भग – वः ।
वपेति वप ॥ अवतत्य धनुः । अवतत्येत्यव – तत्य । धनुस्त्वम् ।
त्वꣳ सहस्राक्ष । सहस्राक्ष शतेषुधे । सहस्राक्षेति सहस्र – अक्ष ।
शतेषुध इति शत – इषुधे ॥ निशीर्य शल्यानाम् । निशीर्येति
नि – शीर्य । शल्यानाम् मुखा । मुखा शिवः । शिवो नः ।
नः सुमनाः । सुमना भव । सुमना इति सु – मनाः । भवेति भव ॥
विज्यम् धनुः । विज्यमिति वि – ज्यम् । धनुः कपर्दिनः । कपर्दिनो
विशल्यः । विशल्यो बाणवान् । विशल्य इति वि – शल्यः ।
बाणवाꣳ उत । बाणवानिति बाण – वान् । उतेत्युत ॥ अनेशन्नस्य ।
अस्येषवः । इषवः आभुः । आभुरस्य । अस्य निषङ्गथिः ।

निषङ्गथिरिति निषङ्गथिः ॥ या ते । ते हेतिः । हेतिर् मीढुष्टम ।
मीढुष्टम हस्ते । मीढुष्टमेति मीढुः – तम । हस्ते बभूव । बभूव ते ।
ते धनुः । धनुरिति धनुः ॥ तयाऽस्मान् । अस्मान्. विश्वतः ।
विश्वतस्त्वम् । त्वमयक्ष्मया । अयक्ष्मया परि । परिब्भुज । भुजेति
भुज ॥ नमस्ते । ते अस्तु । अस्त्वायुधाय । आयुधायानातताय ।
अनातताय धृष्णवे । अनाततायेत्यना–तताय । धृष्णव इति धृष्णवे ॥
उभाभ्यामुत ( ) । उत ते । ते नमः । नमो बाहुभ्याम् । बाहुभ्याम्
तव । बाहुभ्यामिति बाहु–भ्याम् । तव धन्वने । धन्वन इति धन्वने ॥
परि ते । ते धन्वनः । धन्वनो हेतिः । हेतिरस्मान् । अस्मान् वृणक्तु ।
वृणक्तु विश्वतः । विश्वत इति विश्वतः ॥ अथो यः । अथो इत्यथो ।
य इषुधिः । इषुधिस्तव । इषुधिरितीषु–धिः । तवारे । आरे अस्मत् ।
अस्मन् नि । नि धेहि । धेहि तम् । तमिति तम् ॥ **4** (**72/85**)

*(हस्ते – दिक्ष्वि – षव – उभाभ्याम् – द्वाविꣳशतिश्च) (A1)*

**T.S.4.5.2.1 - Kramam**

नमो हिरण्यबाहवे । हिरण्यबाहवे सेनान्ये । हिरण्यबाहव इति
हिरण्य – बाहवे । सेनान्ये दिशाम् । सेनान्य इति सेना – न्ये ।

दिशाञ्च । च पतये । पतये नमः । नमो नमः । नमो वृक्षेभ्यः ।
वृक्षेभ्यो हरिकेशेभ्यः । हरिकेशेभ्यः पशूनाम् । हरिकेशेभ्य इति
हरि – केशेभ्यः । पशूनां पतये । पतये नमः । नमो नमः ।
नमः सस्पिञ्जराय । सस्पिञ्जराय त्विषीमते । त्विषीमते पथीनाम् ।
त्विषीमत इति त्विषि – मते । पथीनां पतये । पतये नमः । नमो
नमः । नमो बभ्लुशाय । बभ्लुशाय विव्याधिने । विव्याधिनेऽन्नानाम् ।
विव्याधिन इति वि – व्याधिने । अन्नानाम् पतये । पतये नमः ।
नमो नमः । नमो हरिकेशाय । हरिकेशायोपवीतिने । हरिकेशायेति
हरि – केशाय । उपवीतिने पुष्टानाम् । उपवीतिन इत्युप – वीतिने ।
पुष्टानाम् पतये । पतये नमः । नमो नमः । नमो भवस्य । भवस्य
हेत्यै । हेत्यै जगताम् । जगताम् पतये । पतये नमः । नमो नमः ।
नमो रुद्राय । रुद्रायाततताविने । आततताविने क्षेत्राणाम् । आततताविन
इत्या – तताविने । क्षेत्राणाम् पतये । पतये नमः । नमो नमः ।
नमः सूताय । सूतायाहन्त्याय । अहन्त्याय वनानाम् । वनानाम्
पतये । पतये नमः । नमो नमः ( ) । नमो रोहिताय । **5** (**50/58**)

**T.S.4.5.2.2 - Kramam**

रोहिताय स्थपतये । स्थपतये वृक्षाणाम् । वृक्षाणाम् पतये ।
पतये नमः । नमो नमः । नमो मन्त्रिणे । मन्त्रिणे वाणिजाय ।
वाणिजाय कक्षाणाम् । कक्षाणाम् पतये । पतये नमः । नमो नमः ।
नमो भुवन्तये । भुवन्तये वारिवस्कृताय । वारिवस्कृतायौषधीनाम् ।
वारिवस्कृतायेति वारिवः–कृताय । ओषधीनाम् पतये । पतये नमः ।
नमो नमः । नम उच्चैर्घोषाय । उच्चैर्घोषायाक्रन्दयते ।
उच्चैर्घोषायेत्युच्चैः – घोषाय । आक्रन्दयते पत्तीनाम् । आक्रन्दयत
इत्या – क्रन्दयते । पत्तीनां पतये । पतये नमः । नमो नमः ।
नमः कृथ्स्नवीताय । कृथ्स्नवीताय धावते । कृथ्स्नवीतायेति
कृथ्स्न – वीताय । धावते सत्वनाम् । सत्वनाम् पतये ।
पतये नमः । नम इति नमः ॥ **6** (**29/33**)

***(वनानाम् पतये नमो नम – एकान्नत्रिꣳशच्च) (A2)***

**T.S.4.5.3.1 - Kramam**

नमः सहमानाय । सहमानाय निव्याधिने । निव्याधिन आव्याधिनीनाम् ।
निव्याधिन इति नि – व्याधिने । आव्याधिनीनाम् पतये ।

आव्याधिनीनामित्या – व्याधिनीनाम् । पतये नमः । नमो नमः ।
नमः ककुभाय । ककुभाय निषङ्गिणे । निषङ्गिणे स्तेनानाम् ।
निषङ्गिण इति नि – सङ्गिने । स्तेनानाम् पतये । पतये नमः ।
नमो नमः । नमो निषङ्गिणे । निषङ्गिण इषुधिमते । निषङ्गिण इति
नि – सङ्गिने । इषुधिमते तस्कराणाम् । इषुधिमत इतीषुधि – मते ।
तस्कराणाम् पतये । पतये नमः । नमो नमः । नमो वञ्चते । वञ्चते
परिवञ्चते । परिवञ्चते स्तायूनाम् । परिवञ्चत इति परि – वञ्चते ।
स्तायूनां पतये । पतये नमः । नमो नमः । नमो निचेरवे । निचेरवे
परिचराय । निचेरव इति नि – चेरवे । परिचरायारण्यानाम् ।
परिचरायेति परि – चराय । अरण्यानाम् पतये । पतये नमः ।
नमो नमः । नमः सृकाविभ्यः । सृकाविभ्यो जिघाꣳसद्भ्यः ।
सृकाविभ्य इति सृकावि – भ्यः । जिघाꣳसद्भ्यो मुष्णताम् ।
जिघाꣳसद्भ्य इति जिघाꣳसत् – भ्यः । मुष्णतां पतये । पतये नमः ।
नमो नमः । नमोऽसिमद्भ्यः । असिमद्भ्यो नक्तम् ।

असिमद्भ्य इत्यसिमत् – भ्यः । नक्तम् चरद्भ्यः । चरद्भ्यः प्रकृन्तानाम् । चरद्भ्य इति चरत् – भ्यः । प्रकृन्तानाम् पतये । प्रकृन्तानामिति प्र – कृन्तानाम् । पतये नमः । नमो नमः । नम उष्णीषिणे । उष्णीषिणे गिरिचराय । गिरिचराय कुलुञ्चानाम् । गिरिचरायेति गिरि – चराय । कुलुञ्चानाम् पतये । पतये नमः । नमो नमः । नम इषुमद्भ्यः । **7 (50/64)**

**T.S.4.5.3.2 - Kramam**

इषुमद्भ्यो धन्वाविभ्यः । इषुमद्भ्य इतीषुमत्–भ्यः । धन्वाविभ्यश्च । धन्वाविभ्य इति धन्वावि – भ्यः । च वः । वो नमः । नमो नमः । नम आतन्वानेभ्यः । आतन्वानेभ्यः प्रतिदधानेभ्यः । आतन्वानेभ्य इत्या – तन्वानेभ्यः । प्रतिदधानेभ्यश्च । प्रतिदधानेभ्य इति प्रति – दधानेभ्यः । च वः । वो नमः । नमो नमः । नम आयच्छद्भ्यः । आयच्छद्भ्यो विसृजद्भ्यः । आयच्छद्भ्य इत्यायच्छत् – भ्यः । विसृजद्भ्यश्च । विसृजद्भ्य इति विसृजत् – भ्यः । च वः । वो नमः । नमो नमः । नमोऽस्यद्भ्यः । अस्यद्भ्यो विद्ध्यद्भ्यः । अस्यद्भ्य इत्यस्यत् – भ्यः ।

विद्ध्यद्भ्यश्च । विद्ध्यद्भ्य इति विद्ध्यत् – भ्यः । च वः ।
वो नमः । नमो नमः । नम आसीनेभ्यः । आसीनेभ्यः शयानेभ्यः ।
शयानेभ्यश्च । च वः । वो नमः । नमो नमः । नमः स्वपद्भ्यः ।
स्वपद्भ्यो जाग्रद्भ्यः । स्वपद्भ्य इति स्वपत्–भ्यः । जाग्रद्भ्यश्च ।
जाग्रद्भ्य इति जाग्रत् – भ्यः । च वः । वो नमः । नमो नमः ।
नमस्तिष्ठद्भ्यः । तिष्ठद्भ्यो धावद्भ्यः । तिष्ठद्भ्य इति तिष्ठत्–भ्यः ।
धावद्भ्यश्च । धावद्भ्य इति धावत् – भ्यः । च वः । वो नमः ।
नमो नमः । नमः सभाभ्यः । सभाभ्यः सभापतिभ्यः ।
सभापतिभ्यश्च । सभापतिभ्य इति सभापति – भ्यः । च वः ।
वो नमः । नमो नमः । नमो अश्वेभ्यः । अश्वेभ्योऽश्वपतिभ्यः ( ) ।
अश्वपतिभ्यश्च । अश्वपतिभ्य इत्यश्वपति – भ्यः । च वः । वो नमः ।
नम इति नमः ॥ **8** (**53/67**)

*(कुलुञ्चानाम् पतये नमो नमो – ऽश्वपतिभ्य – स्त्रीणि च) (A3)*

**T.S.4.5.4.1 - Kramam**

नम आव्याधिनीभ्यः । आव्याधिनीभ्यो विविद्ध्यन्तीभ्यः ।
आव्याधिनीभ्य इत्या – व्याधिनीभ्यः । विविद्ध्यन्तीभ्यश्च ।

विविद्ध्यन्तीभ्य इति वि - विद्ध्यन्तीभ्यः । च वः । वो नमः ।
नमो नमः । नम उगणाभ्यः । उगणाभ्यस्तृꣳहतीभ्यः । तृꣳहतीभ्यश्च ।
च वः । वो नमः । नमो नमः । नमो गृथ्सेभ्यः । गृथ्सेभ्यो
गृथ्सपतिभ्यः । गृथ्सपतिभ्यश्च । गृथ्सपतिभ्य इति गृथ्सपति - भ्यः ।
च वः । वो नमः । नमो नमः । नमो व्रातेभ्यः । व्रातेभ्यो
व्रातपतिभ्यः । व्रातपतिभ्यश्च । व्रातपतिभ्य इति व्रातपति - भ्यः ।
च वः । वो नमः । नमो नमः । नमो गणेभ्यः । गणेभ्यो
गणपतिभ्यः । गणपतिभ्यश्च । गणपतिभ्य इति गणपति - भ्यः ।
च वः । वो नमः । नमो नमः । नमो विरूपेभ्यः । विरूपेभ्यो
विश्वरूपेभ्यः । विरूपेभ्य इति वि - रूपेभ्यः । विश्वरूपेभ्यश्च ।
विश्वरूपेभ्य इति विश्व - रूपेभ्यः । च वः । वो नमः । नमो नमः ।
नमो महद्भ्यः । महद्भ्यः क्षुल्लकेभ्यः । महद्भ्य इति महत्-भ्यः ।
क्षुल्लकेभ्यश्च । च वः । वो नमः । नमो नमः । नमो रथिभ्यः ।
रथिभ्योऽरथेभ्यः । रथिभ्य इति रथि - भ्यः । अरथेभ्यश्च । च वः ।

वो नमः । नमो नमः । नमो रथेभ्यः ।
रथेभ्यो रथपतिभ्यः । **9** (**50/59**)

**T.S.4.5.4.2 - Kramam**

रथपतिभ्यश्च । रथपतिभ्य इति रथपति – भ्यः । च वः । वो नमः ।
नमो नमः । नमः सेनाभ्यः । सेनाभ्यः सेनानिभ्यः । सेनानिभ्यश्च ।
सेनानिभ्य इति सेनानि – भ्यः । च वः । वो नमः । नमो नमः ।
नमः क्षत्तृभ्यः । क्षत्तृभ्यः सङ्ग्रहीतृभ्यः । क्षत्तृभ्यः इति क्षत्तृ–भ्यः ।
सङ्ग्रहीतृभ्यश्च । सङ्ग्रहीतृभ्य इति सङ्ग्रहीतृ – भ्यः । च वः ।
वो नमः । नमो नमः । नमस्तक्षभ्यः । तक्षभ्यो रथकारेभ्यः । तक्षभ्य
इति तक्ष – भ्यः । रथकारेभ्यश्च । रथकारेभ्य इति रथ – कारेभ्यः ।
च वः । वो नमः । नमो नमः । नमः कुलालेभ्यः । कुलालेभ्यः
कर्मारेभ्यः । कर्मारेभ्यश्च । च वः । वो नमः । नमो नमः ।
नमः पुञ्जिष्टेभ्यः । पुञ्जिष्टेभ्यो निषादेभ्यः । निषादेभ्यश्च । च वः ।
वो नमः । नमो नमः । नम इषुकृद्भ्यः । इषुकृद्भ्यो धन्वकृद्भ्यः ।
इषुकृद्भ्य इतीषुकृत् – भ्यः । धन्वकृद्भ्यश्च । धन्वकृद्भ्य इति
धन्वकृत् – भ्यः । च वः । वो नमः । नमो नमः । नमो मृगयुभ्यः ।

मृगयुभ्यः श्वनिभ्यः । मृगयुभ्य इति मृगयु – भ्यः । श्वनिभ्यश्च ।

श्वनिभ्य इति श्वनि – भ्यः । च वः । वो नमः । नमो नमः ।

नमः श्वभ्यः । श्वभ्यः श्वपतिभ्यः । श्वभ्य इति श्व – भ्यः ।

श्वपतिभ्यश्च ( ) । श्वपतिभ्य इति श्वपति – भ्यः । च वः ।

वो नमः । नम इति नमः ॥ **10 (52/64)**

***(रथेभ्यः – श्वपतिभ्यश्च – द्वे च) (A4)***

**T.S.4.5.5.1 - Kramam**

नमो भवाय । भवाय च । च रुद्राय । रुद्राय च । च नमः ।

नमः शर्वाय । शर्वाय च । च पशुपतये । पशुपतये च । पशुपतय

इति पशु – पतये । च नमः । नमो नीलग्रीवाय । नीलग्रीवाय च ।

नीलग्रीवायेति नील–ग्रीवाय । च शितिकण्ठाय । शितिकण्ठाय च ।

शितिकण्ठायेति शिति – कण्ठाय । च नमः । नमः कपर्दिने ।

कपर्दिने च । च व्युप्तकेशाय । व्युप्तकेशाय च । व्युप्तकेशायेति

व्युप्त – केशाय । च नमः । नमः सहस्राक्षाय । सहस्राक्षाय च ।

सहस्राक्षायेति सहस्र – अक्षाय । च शतधन्वने । शतधन्वने च ।

शतधन्वन इति शत – धन्वने । च नमः । नमो गिरिशाय ।

गिरिशाय च । च शिपिविष्टाय । शिपिविष्टाय च । शिपिविष्टायेति शिपि – विष्टाय । च नमः । नमो मीढुष्टमाय । मीढुष्टमाय च । मीढुष्टमायेति मीढुः – तमाय । चेषुमते । इषुमते च । इषुमत इतीषु – मते । च नमः । नमो ह्रस्वाय । ह्रस्वाय च । च वामनाय । वामनाय च । च नमः । नमो बृहते । बृहते च । च वर्.षीयसे । वर्.षीयसे च । च नमः । नमो वृद्धाय । वृद्धाय च । च सम्ँवृद्ध्वने । सम्ँवृद्ध्वने च ( ) । सम्ँवृद्ध्वन इति सं – वृद्ध्वने । च नमः । **11** (**50/60**)

**T.S.4.5.5.2 - Kramam**

नमो अग्रियाय । अग्रियाय च । च प्रथमाय । प्रथमाय च । च नमः । नम आशवे । आशवे च । चाजिराय । अजिराय च । च नमः । नमः शीघ्रियाय । शीघ्रियाय च । च शीभ्याय । शीभ्याय च । च नमः । नम ऊर्म्याय । ऊर्म्याय च । चावस्वन्याय । अवस्वन्याय च । अवस्वन्यायेत्यव – स्वन्याय । च नमः । नमः स्रोतस्याय । स्रोतस्याय च । च द्वीप्याय । द्वीप्याय च । चेति च ॥ **12** (**25/26**) *(सँवृध्वने च – पञ्चविꣳशतिश्च) (A5)*

**T.S.4.5.6.1 - Kramam**

नमो ज्येष्ठाय । ज्येष्ठाय च । च कनिष्ठाय । कनिष्ठाय च । च नमः ।
नमः पूर्वजाय । पूर्वजाय च । पूर्वजायेति पूर्व–जाय । चापरजाय ।
अपरजाय च । अपरजायेत्यपर–जाय । च नमः । नमो मद्ध्यमाय ।
मद्ध्यमाय च । चापगल्भाय । अपगल्भाय च ।
अपगल्भायेत्यप – गल्भाय । च नमः । नमो जघन्याय । जघन्याय
च । च बुद्धियाय । बुद्धियाय च । च नमः । नमः सोभ्याय ।
सोभ्याय च । च प्रतिसर्याय । प्रतिसर्याय च । प्रतिसर्यायेति
प्रति–सर्याय । च नमः । नमो याम्याय । याम्याय च । च क्षेम्याय ।
क्षेम्याय च । च नमः । नम उर्वर्याय । उर्वर्याय च । च खल्याय ।
खल्याय च । च नमः । नमः श्लोक्याय । श्लोक्याय च ।
चावसान्याय । अवसान्याय च । अवसान्यायेत्यव – सान्याय ।
च नमः । नमो वन्याय । वन्याय च । च कक्ष्याय । कक्ष्याय च ।
च नमः । नमः श्रवाय । श्रवाय च । च प्रतिश्रवाय ।
प्रतिश्रवाय च ( ) । प्रतिश्रवायेति प्रति – श्रवाय ।
च नमः । **13 (50/56)**

**T.S.4.5.6.2 - Kramam**

नम आशुषेणाय । आशुषेणाय च । आशुषेणायेत्याशु – सेनाय ।

चाशुरथाय । आशुरथाय च । आशुरथायेत्याशु – रथाय । च नमः ।

नमः शूराय । शूराय च । चावभिन्दते । अवभिन्दते च । अवभिन्दत

इत्यव–भिन्दते । च नमः । नमो वर्मिणे । वर्मिणे च । च वरूथिने ।

वरूथिने च । च नमः । नमो बिल्मिने । बिल्मिने च । च कवचिने ।

कवचिने च । च नमः । नमः श्रुताय । श्रुताय च । च श्रुतसेनाय ।

श्रुतसेनाय च । श्रुतसेनायेति श्रुत – सेनाय ।

चेति च ॥ 14 (25/29) *(प्रतिश्रवाय च – पञ्चविꣳशतिश्च) (A6)*

**T.S.4.5.7.1 - Kramam**

नमो दुन्दुभ्याय । दुन्दुभ्याय च । चाहनन्याय । आहनन्याय च ।

आहनन्यायेत्या – हनन्याय । च नमः । नमो धृष्णवे । धृष्णवे च ।

च प्रमृशाय । प्रमृशाय च । प्रमृशायेति प्र – मृशाय । च नमः ।

नमो दूताय । दूताय च । च प्रहिताय । प्रहिताय च । प्रहितायेति

प्र – हिताय । च नमः । नमो निषङ्गिणे । निषङ्गिणे च ।

निषङ्गिण इति नि – सङ्गिने । चेषुधिमते । इषुधिमते च ।

इषुधिमत इतीषुधि – मते । च नमः । नम स्तीक्ष्णेषवे । तीक्ष्णेषवे च । तीक्ष्णेषव इति तीक्ष्ण – इषवे । चायुधिने । आयुधिने च । च नमः । नमः स्वायुधाय । स्वायुधाय च । स्वायुधायेति सु – आयुधाय । च सुधन्वने । सुधन्वने च । सुधन्वन इति सु – धन्वने । च नमः । नमः स्रुत्याय । स्रुत्याय च । च पथ्याय । पथ्याय च । च नमः । नमः काव्याय । काव्याय च । च नीप्याय । नीप्याय च । च नमः । नमः सूद्याय । सूद्याय च । च सरस्याय । सरस्याय च । च नमः । नमो नाद्याय । नाद्याय च । च वैशन्ताय । वैशन्ताय च ( ) । च नमः । **15** (**50/58**)

**<u>T.S.4.5.7.2 - Kramam</u>**

नमः कूप्याय । कूप्याय च । चावट्याय । अवट्याय च । च नमः । नमो वर्ष्याय । वर्ष्याय च । चावर्ष्याय । अवर्ष्याय च । च नमः । नमो मेघ्याय । मेघ्याय च । च विद्युत्याय । विद्युत्याय च । विद्युत्यायेति वि – द्युत्याय । च नमः । नम ईद्ध्रियाय । ईद्ध्रियाय च । चातप्याय । आतप्याय च । आतप्यायेत्या – तप्याय । च नमः । नमो वात्याय । वात्याय च । च रेष्मियाय । रेष्मियाय च । च नमः ।

नमो वास्तव्याय । वास्तव्याय च । च वास्तुपाय । वास्तुपाय च ।
वास्तुपायेति वास्तु – पाय । चेति च ॥ **16** (**30/33**)

*(वैशन्ताय च – त्रिꣳशच्च) (A7)*

**T.S.4.5.8.1 - Kramam**

नमः सोमाय । सोमाय च । च रुद्राय । रुद्राय च । च नमः ।
नमस्ताम्राय । ताम्राय च । चारुणाय । अरुणाय च । च नमः ।
नमः शङ्गाय । शङ्गाय च । च पशुपतये । पशुपतये च ।
पशुपतय इति पशु – पतये । च नमः । नम उग्राय । उग्राय च ।
च भीमाय । भीमाय च । च नमः । नमो अग्रेवधाय । अग्रेवधाय च ।
अग्रेवधायेत्यग्रे – वधाय । च दूरेवधाय । दूरेवधाय च । दूरेवधायेति
दूरे – वधाय । च नमः । नमो हन्त्रे । हन्त्रे च । च हनीयसे ।
हनीयसे च । च नमः । नमो वृक्षेभ्यः । वृक्षेभ्यो हरिकेशेभ्यः ।
हरिकेशेभ्यो नमः । हरिकेशेभ्य इति हरि – केशेभ्यः । नमस्ताराय ।
ताराय नमः । नमः शम्भवे । शम्भवे च । शम्भव इति शं – भवे ।
च मयोभवे । मयोभवे च । मयोभव इति मयः – भवे । च नमः ।

नमः शङ्कराय । शङ्कराय च । शङ्करायेति शं – कराय ।

च मयस्कराय । मयस्कराय च । मयस्करायेति मयः – कराय ।

च नमः । नमः शिवाय । शिवाय च । च शिवतराय ।

शिवतराय च ( ) । शिवतरायेति शिव–तराय । च नमः । **17 (50/59)**

**T.S.4.5.8.2 - Kramam**

नमस्तीर्थ्याय । तीर्थ्याय च । च कूल्याय । कूल्याय च । च नमः ।

नमः पार्याय । पार्याय च । चावार्याय । अवार्याय च । च नमः ।

नमः प्रतरणाय । प्रतरणाय च । प्रतरणायेति प्र – तरणाय ।

चोत्तरणाय । उत्तरणाय च । उत्तरणायेत्युत् – तरणाय । च नमः ।

नम आतार्याय । आतार्याय च । आतार्यायेत्या–तार्याय । चालाद्याय ।

आलाद्याय च । आलाद्यायेत्या–लाद्याय । च नमः । नमः शष्प्याय ।

शष्प्याय च । च फेन्याय । फेन्याय च । च नमः । नमः सिकत्याय ।

सिकत्याय च । च प्रवाह्याय । प्रवाह्याय च ।

प्रवाह्यायेति प्र – वाह्याय । चेति च ॥ **18 (30/35)**

*(शिवतराय च – त्रिꣳशच्च) (A8)*

**T.S.4.5.9.1 - Kramam**

नम इरिण्याय । इरिण्याय च । च प्रपथ्याय । प्रपथ्याय च ।
प्रपथ्यायेति प्र – पथ्याय । च नमः । नमः कि॒ꣳशिलाय ।
कि॒ꣳशिलाय च । च क्षयणाय । क्षयणाय च । च नमः । नमः
कपर्दिने । कपर्दिने च । च पुलस्तये । पुलस्तये च । च नमः ।
नमो गोष्ठ्याय । गोष्ठ्याय च । गोष्ठ्यायेति गो – स्थ्याय ।
च गृह्याय । गृह्याय च । च नमः । नमस्तल्प्याय । तल्प्याय च ।
च गेह्याय । गेह्याय च । च नमः । नमः काट्याय । काट्याय च ।
च गह्वरेष्ठाय । गह्वरेष्ठाय च । गह्वरेष्ठायेति गह्वरे – स्थाय । च नमः ।
नमो ह्रदय्याय । ह्रदय्याय च । च निवेष्प्याय । निवेष्प्याय च ।
निवेष्प्यायेति नि – वेष्प्याय । च नमः । नमः पाꣳसव्याय ।
पाꣳसव्याय च । च रजस्याय । रजस्याय च । च नमः ।
नमः शुष्क्याय । शुष्क्याय च । च हरित्याय । हरित्याय च ।
च नमः । नमो लोप्याय । लोप्याय च । चोलप्याय ।
उलप्याय च ( ) । च नमः । **19 (50/54)**

**T.S.4.5.9.2 - Kramam**

नम ऊर्व्याय । ऊर्व्याय च । च सूर्म्याय । सूर्म्याय च । च नमः ।

नमः पर्ण्याय । पर्ण्याय च । च पर्णशद्याय । पर्णशद्याय च ।

पर्णशद्यायेति पर्ण - शद्याय । च नमः । नमोऽपगुरमाणाय ।

अपगुरमाणाय च । अपगुरमाणायेत्यप - गुरमाणाय । चाभिघ्नते ।

अभिघ्नते च । अभिघ्नत इत्यभि - घ्नते । च नमः ।

नम आक्खिदते । आक्खिदते च । आक्खिदत इत्या - खिदते ।

च प्रक्खिदते । प्रक्खिदते च । प्रक्खिदत इति प्र - खिदते ।

च नमः । नमो वः । वः किरिकेभ्यः । किरिकेभ्यो देवानाम् ।

देवाना॒ हृदयेभ्यः । हृदयेभ्यो नमः । नमो विक्षीणकेभ्यः ।

विक्षीणकेभ्यो नमः । विक्षीणकेभ्य इति वि - क्षीणकेभ्यः ।

नमो विचिन्वत्केभ्यः । विचिन्वत्केभ्यो नमः । विचिन्वत्केभ्य इति

वि - चिन्वत्केभ्यः । नम आनिर्.हतेभ्यः । आनिर्.हतेभ्यो नमः ।

आनिर्.हतेभ्य इत्यानिः - हतेभ्यः । नम आमीवत्केभ्यः ।

आमीवत्केभ्य इत्या - मीवत्केभ्यः ॥ **20** (**33/41**)

*(उलप्याय च - त्रयस्त्रि॒शच्च) (A9)*

**T.S.4.5.10.1 - Kramam**

द्रापे अन्धसः । अन्धसस्पते । पते दरिद्रत् । दरिद्रन् नीललोहित । नीललोहितेति नील – लोहित ॥ एषां पुरुषाणाम् । पुरुषाणामेषाम् । एषां पशूनाम् । पशूनां मा । मा भेः । भेर् मा । माऽरः । अरो मो । मो एषाम् । मो इति मो । एषाम् किम् । किम् चन । चनाममत् । आममदित्याममत् ॥ या ते । ते रुद्र । रुद्र शिवा । शिवा तनूः । तनूः शिवा । शिवा विश्वाहभेषजी । विश्वाहभेषजीति विश्वाह – भेषजी ॥ शिवा रुद्रस्य । रुद्रस्य भेषजी । भेषजी तया । तया नः । नो मृड । मृड जीवसे । जीवस इति जीवसे ॥ इमाꣳ रुद्राय । रुद्राय तवसे । तवसे कपर्दिने । कपर्दिने क्षयद्वीराय । क्षयद्वीराय प्र । क्षयद्वीरायेति क्षयत् – वीराय । प्र भरामहे । भरामहे मतिम् । मतिमिति मतिम् ॥ यथा नः । नः शम् । शमसत् । असद् द्विपदे । द्विपदे चतुष्पदे । द्विपद इति द्वि – पदे । चतुष्पदे विश्वम् । चतुष्पद इति चतुः–पदे । विश्वं पुष्टम् । पुष्टं ग्रामे । ग्रामे अस्मिन्न् । अस्मिन्ननातुरम् । **21**

(**50/54**)

**T.S.4.5.10.2 - Kramam**

अनातुरमित्यना – तुरम् ॥ मृडा नः । नो रुद्र । रुद्रोत । उत नः ।
नो मयः । मयस्कृधि । कृधि क्षयद्वीराय । क्षयद्वीराय नमसा ।
क्षयद्वीरायेति क्षयत् – वीराय । नमसा विधेम । विधेम ते ।
त इति ते ॥ यच्छम् । शम् च । च योः । योश्च । च मनुः ।
मनुरायजे । आयजे पिता । आयज इत्या – यजे । पिता तत् ।
तदश्याम । अश्याम तव । तव रुद्र । रुद्र प्रणीतौ । प्रणीताविति
प्र – नीतौ ॥ मा नः । नो महान्तम् । महान्तमुत । उत मा । मा नः ।
नो अर्भकम् । अर्भकम् मा । मा नः । न उक्षन्तम् । उक्षन्तमुत ।
उत मा । मा नः । न उक्षितम् । उक्षितमित्युक्षितम् ॥ मा नः ।
नो वधीः । वधीः पितरम् । पितरम् मा । मोत । उत मातरम् ।
मातरम् प्रियाः । प्रिया मा । मा नः । नस्तनुवः ।
तनुवो रुद्र । 22 (50/52)

**T.S.4.5.10.3 - Kramam**

रुद्र रीरिषः । रीरिषः इति रीरिषः ॥ मा नः । नस्तोके । तोके तनये ।
तनये मा । मा नः । न आयुषि । आयुषि मा । मा नः । नो गोषु ।

गोषु मा । मा नः । नो अश्वेषु । अश्वेषु रीरिषः । रीरिष इति रीरिषः ॥
वीरान् मा । मा नः । नो रुद्र । रुद्र भामितः । भामितो वधीः ।
वधीर्. हविष्मन्तः । हविष्मन्तो नमसा । नमसा विधेम । विधेम ते ।
त इति ते ॥ आरात् ते । ते गोघ्ने । गोघ्न उत । गोघ्न इति
गो – घ्ने । उत पूरुषघ्ने । पूरुषघ्ने क्षयद्वीराय । पूरुषघ्न इति
पूरुष – घ्ने । क्षयद्वीराय सुम्नम् । क्षयद्वीरायेति क्षयत् – वीराय ।
सुम्नमस्मे । अस्मे ते । अस्मे इत्यस्मे । ते अस्तु । अस्त्वित्यस्तु ॥
रक्षा च । च नः । नो अधि । अधि च । च देव । देव ब्रूहि ।
ब्रूह्यध । अधा च । च नः । नः शर्म । शर्म यच्छ । यच्छ द्विबर्.हाः ।
द्विबर्.हा इति द्वि – बर्.हाः ॥ स्तुहि श्रुतम् । **23** (**50/54**)

**T.S.4.5.10.4 - Kramam**

श्रुतं गर्त्तसदम् । गर्त्तसदम् युवानम् । गर्त्तसदमिति गर्त्त – सदम् ।
युवानं मृगम् । मृगम् न । न भीमम् । भीममुपहत्नुम् । उपहत्नुमुग्रम् ।
उग्रमित्युग्रम् ॥ मृडा जरित्रे । जरित्रे रुद्र । रुद्र स्तवानः । स्तवानो
अन्यम् । अन्यम् ते । ते अस्मत् । अस्मन् नि । नि वपन्तु । वपन्तु
सेनाः । सेना इति सेनाः ॥ परि णः । नो रुद्रस्य । रुद्रस्य हेतिः ।

हेतिर् वृणक्तु । वृणक्तु परि । परि त्वेषस्य । त्वेषस्य दुर्मतिः । दुर्मतिरघायोः । दुर्मतिरिति दुः – मतिः । अघायोरित्यघ – योः ॥ अव स्थिरा । स्थिरा मघवद्भ्यः । मघवद्भ्य स्तनुष्व । मघवद्भ्य इति मघवत् – भ्यः । तनुष्व मीढ्वः । मीढ्व स्तोकाय । तोकाय तनयाय । तनयाय मृडय । मृडयेति मृडय ॥ मीढुष्टम शिवतम । मीढुष्टमेति मीढुः – तम । शिवतम शिवः । शिवतमेति शिव–तम । शिवो नः । नः सुमनाः । सुमना भव । सुमना इति सु – मनाः । भवेति भव ॥ परमे वृक्षे । वृक्ष आयुधम् । आयुधम् निधाय । निधाय कृत्तिम् । निधायेति नि – धाय । कृत्तिम् ँवसानः । वसान आ । आ चर । चर पिनाकम् ( ) । पिनाकम् बिभ्रत् । **24 (50/57)**

**T.S.4.5.10.5 - Kramam**

बिभ्रदा । आ गहि । गहीति गहि ॥ विकिरिद विलोहित । विकिरिदेति वि–किरिद । विलोहित नमः । विलोहितेति वि – लोहित । नमस्ते । ते अस्तु । अस्तु भगवः । भगव इति भग – वः ॥ यास्ते । ते सहस्रम् । सहस्रꣳ हेतयः । हेतयोऽन्यम् । अन्यमस्मत् । अस्मन् नि । नि वपन्तु । वपन्तु ताः । ता इति ताः ॥

सहस्राणि सहस्रधा । सहस्रधा बाहुवोः । सहस्रधेति सहस्र – धा । बाहुवोस्तव । तव हेतयः । हेतय इति हेतयः ॥ तासामीशानः । ईशानो भगवः । भगवः पराचीना । भगव इति भग – वः । पराचीना मुखा । मुखा कृधि । कृधीति कृधि ॥ **25** (**29/33**)

*(अस्मि॑ – स्तनुवः – स्तुहि – पिनाक – मेकान्नत्रि॑शच्च)*

*(A10)*

**T.S.4.5.11.1 - Kramam**

सहस्राणि सहस्रशः । सहस्रशो ये । सहस्रश इति सहस्र – शः । ये रुद्राः । रुद्रा अधि । अधि भूम्याम् । भूम्यामिति भूम्याम् ॥ तेषा॑ं सहस्रयोजने । सहस्रयोजनेऽव । सहस्रयोजन इति सहस्र–योजने । अव धन्वानि । धन्वानि तन्मसि । तन्मसीति तन्मसि ॥ अस्मिन् महति । महत्यर्णवे । अर्णवेऽन्तरिक्षे । अन्तरिक्षे भवाः । भवा अधि । अधीत्यधि ॥ नीलग्रीवाः शितिकण्ठाः । नीलग्रीवा इति नील – ग्रीवाः । शितिकण्ठाः शर्वाः । शितिकण्ठा इति शिति – कण्ठाः । शर्वा अधः । अधः क्षमाचराः । क्षमाचरा इति क्षमाचराः ॥ नीलग्रीवाः शितिकण्ठाः । नीलग्रीवा इति नील–ग्रीवाः ।

शितिकण्ठा दिवम् । शितिकण्ठा इति शिति - कण्ठाः । दिवꣳ रुद्राः । रुद्रा उपश्रिताः । उपश्रिता इत्युप - श्रिताः ॥ ये वृक्षेषु । वृक्षेषु सस्पिञ्जराः । सस्पिञ्जरा नीलग्रीवाः । नीलग्रीवा विलोहिताः । नीलग्रीवा इति नील - ग्रीवाः । विलोहिता इति वि - लोहिताः ॥ ये भूतानाम् । भूतानामधिपतयः । अधिपतयो विशिखासः । अधिपतय इत्यधि - पतयः । विशिखासः कपर्दिनः । विशिखास इति वि - शिखासः । कपर्दिन इति कपर्दिनः ॥ ये अन्नेषु । अन्नेषु विविद्ध्यन्ति । विविद्ध्यन्ति पात्रेषु । विविद्ध्यन्तीति वि - विद्ध्यन्ति । पात्रेषु पिबतः । पिबतो जनान् । जनानिति जनान् ॥ ये पथाम् । पथां पथिरक्षयः । पथिरक्षय ऐलबृदाः । पथिरक्षय इति पथि - रक्षयः । ऐलबृदा यव्युधः । यव्युध इति यव्युधः ॥ ये तीर्थानि । तीर्थानि प्रचरन्ति । **26 (50/61)**

**T.S.4.5.11.2 - Kramam**

प्रचरन्ति सृकावन्तः । प्रचरन्तीति प्र - चरन्ति । सृकावन्तो निषङ्गिणः । सृकावन्त इति सृका - वन्तः । निषङ्गिण इति नि - सङ्गिनः ॥ य एतावन्तः । एतावन्तश्च । च भूयाꣳसः ।

भूयाꣳ॑सश्च । च दिशः॑ । दिशो॑ रु॒द्राः । रु॒द्रा वि॑तस्थि॒रे । वि॒त॒स्थि॒र इति॑ वि – त॒स्थि॒रे ॥ तेषाꣳ॑ सहस्रयोज॒ने । स॒ह॒स्र॒यो॒ज॒नेऽव॑ । स॒ह॒स्र॒यो॒ज॒न इति॑ सहस्र–यो॒ज॒ने । अव॒ धन्वा॑नि । धन्वा॑नि तन्मसि । त॒न्म॒सीति॑ तन्मसि ॥ नमो॑ रु॒द्रेभ्यः॑ । रु॒द्रेभ्यो॒ ये । ये पृ॑थि॒व्याम् । पृ॒थि॒व्यां ँये । ये᳚ऽन्तरि॑क्षे । अ॒न्तरि॑क्षे॒ ये । ये दि॒वि । दि॒वि येषा᳚म् । येषा॒मन्न᳚म् । अन्न॒म् ँवातः॑ । वातो॑ व॒र्.॒षम् । व॒र्.॒षमिष॑वः । इष॒वस्तेभ्यः॑ । तेभ्यो॒ दश॑ । दश॒ प्राचीः᳚ । प्राची॒र् दश॑ । दश॑ दक्षि॒णा । द॒क्षि॒णा दश॑ । दश॑ प्र॒तीचीः᳚ । प्र॒तीची॒र् दश॑ । दशोदी॑चीः । उदीची॒र् दश॑ । दशो॒र्द्ध्वाः । ऊ॒र्द्ध्वास्तेभ्यः॑ । तेभ्यो॒ नमः॑ । नम॒स्ते । ते नः॑ । नो॒ मृ॒ड॒य॒न्तु॒ । मृ॒ड॒य॒न्तु॒ ते । ते यम् । यं द्वि॒ष्मः । द्वि॒ष्मो यः । यश्च॑ ( ) । च॒ नः॒ । नो॒ द्वेष्टि॑ । द्वेष्टि॒ तम् । तं ँवः॑ । वो॒ जंभे᳚ । जंभे॑ दधामि । द॒धा॒मीति॑ दधामि ॥ **27** (**56/59**)

*(ती॒र्थानि॒ – यश्च॒ – षट् च॑) (A11)*

================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(नमस्ते रुद्र – नमो हिरण्यबाहवे – नमः सहमानाय – नम आव्याधिनीभ्यो – नमो भवाय – नमो ज्येष्ठाय – नमो दुन्दुभ्याय – नमः सोमाय – नम इरिण्याय – द्रापे – सहस्रा – ण्येकादश)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(नमस्ते रुद्र – नमो भवाय – द्रापे – सप्तवि॒ꣳशतिः)

**First and Last Padam of Fifth Prasnam of Kandam 4:-**

(नमस्ते रुद्र – तं ँवो जंभे दधामि)

**॥ हरिः ओं ॥**

**॥ इति चतुर्थ काण्डे पञ्चम प्रश्नः – क्रम पाठः समाप्तः ॥**

**=====================**

**Details of Panchati ,Padam and Krama Vaakyam for Kandam 4 – Prasanam 5 – TS 4.5**

| | Panchati | Padams | Krama Vaakyams |
|---|---|---|---|
| Anuvakam 1 | 4 | 222 | 251 |
| Anuvakam 2 | 2 | 79 | 91 |
| Anuvakam 3 | 2 | 103 | 131 |
| Anuvakam 4 | 2 | 102 | 123 |
| Anuvakam 5 | 2 | 75 | 86 |
| Anuvakam 6 | 2 | 75 | 85 |
| Anuvakam 7 | 2 | 80 | 91 |
| Anuvakam 8 | 2 | 80 | 94 |
| Anuvakam 9 | 2 | 83 | 95 |
| Anuvakam 10 | 5 | 229 | 250 |
| Anuvakam 11 | 2 | 106 | 120 |
| Total → | 27 | 1234 | 1417 |